त्वात् पृषो० कल्पना युक्तैव । एवं "भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यं तथैव च" हरिवं० १४५ अ० ।

**चोस्का** पु० १हयोत्तमे शब्दार्थचि० । २सिन्धुवारे (सोँदाल) वृक्षे च त्रिका० ।

**चौड(ल)** न० चूडा प्रयोजनमस्य चूडा० ण: वा डस्य ल: । चूडाकर्म्मणि चूडाशब्दे २९५७ पृ० दृश्यम् "गार्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबन्धनैः" मनुः । चूडैव स्वार्थे अण् । चूडायाम् "लेलिहानैर्महानागैः कृतचौडमभिवहन्"भा० व० १७अ० ।

**चौडि** पुंस्त्री चूडाया इदम् बाह्वा० इञ् । चूडासम्बन्धिनि स्त्रियां वा० ङीप् ।

**चौराष्ट्र(राड्र)** न० जलभेदे चुत्ताशब्दे पृ०२९५५ दृश्यम् ।

**चौदायनि** पु० गोत्रप्रवर्त्तके प्रवराध्यायप्रसिद्धे ऋषिभेदे

**चौपयत** पु० चुप—अच् चोपः सन् यतते यत—अच् ततः स्वार्थे अण् । ऋषिभेदे तस्यापत्यम् तिका० फिञ् । चौपयतायनि तदपत्ये स्त्रियां तु क्रौड्या० ष्यङ् । चौपयत्या । चौपयतानां विषयः भौरि० विधल् । चौपयतविध तद्विषये न० । गोत्रापत्ये अश्वा० फक् चौपयतायन तद्गोत्रापत्ये पुंस्त्री

**चौपैया** स्त्री मात्रावृत्तभेदे तल्लक्षणं यथा "चौपैयावृत्तं त्रिंशन्मात्रं फणिपतिपिङ्गलभणितं कुरु सप्ततुरङ्गममति हृदयङ्गम मन्ते गुरुमुपनीतम् । यदि दशवसुरविभिश्छन्दोविद्भिः क्रियते यतिरभिरामम् सपदि स्तवसमये नृपतिः कवये वितरति संसदि कामम्" ।

**चौर** पु० चुरा शीलमस्य चूड़ा० ण: चोरएव अण् वा । प्रच्छन्नपरद्रव्याहारके अमरः । "सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम्" मनुः २कविभेदे कवी चौरमयूरकौ" उद्भटः तत्कृतग्रन्थश्चौरपाञ्चाशिका ।

**चौरपुष्पौषधि** स्त्री चौरपुष्पिकानामौषधौ मेदि० ।

**चौरिकाक** पु० काकभेदे "लवणं चौरयित्वा तु चौरिकाकः प्रजायते" भा०अनु० १११अ० ।

**चौलि(डि)** पु० चौलस्यापत्यम् इञ । प्रवराध्यायप्रसिद्धे ऋषिभेदे ।

**चौलुक्य** पुंस्त्री चुलुकस्य गोत्रापत्यं गर्गा० यञ् । चुलुकर्षिगोत्रापत्ये तस्य छात्त्रः कण्वा० अण् यलोपः । चौलुक चौलुक्यच्छात्त्रे ।

**च्यवन** पु० च्यु—ल्यु । भार्गवे ऋषिभेदे तस्य नामनिरुक्तिः भा० आ० ६ अ० दर्शिता यथा । "भृगोः सुदयिता भार्य्या पुलोमेत्यभिविश्रुता । तस्यां समभवद्गर्भो भृगुवीर्य्यसमुद्भवः । अस्मिन् गर्भेऽथ सम्भूते पुलोमायां भृगूद्वह ! । समये समशीलिन्यां धर्मपत्न्यां यशस्विनः । अभिषेकाय निष्क्रान्ते भृगौ धर्म्मभृतां वरे । आश्रमं तस्य रक्षोऽथ पुलोमाऽभ्याजगाम ह । तं प्रविश्याश्रमं दृष्ट्वा भृगोर्भार्य्यामनिन्दिताम् । हृच्छयेन समाविष्टो विचेताः समपद्यत" । ५अ० इत्युपक्रमे "अग्नेरथ बचः श्रुत्वा तद्रक्षः प्रजहार ताम् । ब्रह्मन् ! वराहरूपेण मनोमारुतरंहसा । ततः स गर्भो निवसन् कुक्षौ भृगुकुलोद्वह ! । रोषान् मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोऽभवत् । तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्च्चसम् । तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य ताम् । सा तमादाय सुश्रोणी ससार भृगुनन्दनम् । च्यवनं भार्गवं पुत्रं पुलोमा दुःखमूर्च्छिता" ६अ० । २क्षरणयुक्ते त्रि० "यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया । अग्निर्निश्च्यवनो नाम" भा०व०२१८ अ० । भावे ल्युट् । ३क्षरणे न० दुश्च्यवनः ।

**च्यवनप्राश** पु० च्यवनेन प्राश्यते प्र+अश० कर्मणि घञ् । चक्रदत्तोक्ते औषधभेदे यथा "विल्वाग्निमन्थश्योनाककाश्मर्य्यः पाटली बला । पर्ण्यश्चतस्रः पिप्पल्यः श्वदंष्ट्रा बृहतीद्वयम् । शृङ्गी तामलकी द्राक्षा जीवन्ती पुष्करा गुरु । अभया सामृता ऋद्धिर्जीवकर्षभकौ शठी । मुस्तं पुनर्णवा मेदा सूक्ष्मैलोत्पलचन्दने । विदारी वृषमूलानि काकोली काकनासिका । एषां पलोन्मितान् भागान् शतान्यामलकस्य च । पञ्च दद्यात् तदैकध्यं जलद्रोणे विपाचयेत् । ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम् । तच्चामलकमुद्धृत्य निष्कुलं तैलसर्पिषोः । पलद्वादशके भृष्ट्वा दत्त्वा चार्द्धतुलां भिषक् । मत्स्यण्डिकायाः पूताया लेहवत् साधु साधयेत् । षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत् । चतुष्पलं तु गाम्भार्य्याः पिप्पल्या द्विपलन्तथा । पलमेकं निदध्याच्च त्वगेलापत्रकेशरात् । इत्ययं च्यवनप्राशः परमुक्तो रसायनः । कासश्वासहरश्चैव विशेषेणोपदिश्यते । क्षीणक्षतानां वृद्धानां बालानाञ्चाङ्गवर्द्धनम् । स्वरक्षयमुरोरोगं हृद्रोगं वातशोणितम् । पिपासां मूत्रशुक्रस्थान् दोषांश्चैवापकर्षति । अस्य मात्रां प्रयुञ्जीत चोपरुन्ध्याच्च भोजनम् । अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत् पुनर्युवा । मेधां स्मृतिं कान्तिमनामयत्वं